श्री शिव मानसिक पूजा स्तोत्रं

श्री शिव मानसिक पूजा स्तोत्रं

अनुचितमनुलपितं मे त्वयि शंभो शिव तदागसश्शांत्यै |
अर्चां कथमपि विहितामंगीकुरु सर्वमंगलोपेत || 1 ||

ध्यायामि कथमिव त्वां धीवर्त्मविदूर दिव्यमहिमानं |
आवाहनं विभोस्ते देवाग्र्य भवेत्प्रभो कुतः स्थानात् || 2 ||

कियदासनं प्रकल्प्यं कृतासनस्येह सर्वतोऽपि सह |
पाद्यं कुतोऽर्घ्यमपि वा पाद्यं सर्वत्रपाणिपादस्य || 3 ||

आचमनं ते स्यादधिभगवन् ते सर्वतोमुखस्य कथं |
मधुपर्को वा कथमिह मधुवैरिणि दर्शितप्रसादस्य || 4 ||

स्नानेन किं विधेयं सलिलकृतेनेह नित्यशुद्धस्य |
वस्त्रेणापि न कार्यं देवाधिपते दिगंबरस्येह || 5 ||

स्फुरति हि सर्पाभरणं सर्वांगे सर्वमंगलाकार |
अतिवर्णाश्रमिणस्तेऽस्त्युपवीतेनेह कश्चिदुत्कर्षः || 6 ||

गंधवती हि तनुस्ते गंधाः किं नेश पौनरुक्ताय |
पुष्कलफलदातारं पुष्करकुसुमेन पूजयामि त्वां || 7 ||

शमधनमूलधनं त्वां सकलेश्वर भवसि धूपितः केन |
दीपः कथं शिखावान् दीप्येत पुरः स्वयंप्रकाशस्य || 8 ||

अमृतात्मकमपि भगवन्नशनं किन्नाम नित्यतृप्तस्य |
त्वय्याम्रेडितमेतत्तांबूलं यदिह सुमुखरागाय || 9 ||

उपहारीभूयादिदमुमेश यन्मे विचेष्टितमशेषं |
नीराजयामि तमिमं नानात्मानं सहाखिलैः करणैः || 10 ||

सुमनश्शेखर भव ते सुमनोऽञ्जलिरेष को भवेच्छंभो |
छत्रं द्युमन् द्युमार्धन् चामरमपि किं जितश्रमस्य तव || 11 ||

नृत्यं प्रथतां कथमिव नाथ तवाग्रे महानटस्येह |
गीतं किं पुरवैरिन् गीतागममूलदेशिकस्य पुरः || 12 ||

वाद्यं डमरु भृतस्ते वादयितुं ते पुरोऽस्ति का शक्तिः |
अपरिच्छिन्नस्य भवेदखिलेश्वर कः प्रदक्षिणविधिस्ते || 13 ||

स्युस्ते नमांसि कथमिव शंकर परितोऽपि विद्यमानस्य |
वाचामगोचरे त्वयि वाक्प्रसरो मे कथं सुसंभवतु || 14 ||

नित्यानंदाय नमो निर्मलविज्ञानविग्रहाय नमः |
निरवधिकरुणाय नमो निरवधिविभवाय तेजसेऽस्तु नमः || 15 ||

सरसिजविपक्षचूडः सगरतनूजन्मसुकृतमूर्धाऽसौ |
दृक्कूलंकषकरुणो दृष्टिपथे मेऽस्तु धवलिमा कोऽपि || 16 ||

जगदाधारशरासं जगदुत्पादप्रवीणयंतारं |
जगदवनकर्मठशरं जगदुद्धारं श्रयामि चित्सारं || 17 ||

कुवलयसहयुध्वगलैः कुलगिरिकूटस्थकवचितार्धांगैः |
कलुषविदूरैश्चेतः कबलितमेतत्कृपारसैः किंचित् || 18 ||

वसनवतेकत्कृत्या वासवते रजतशैलशिखरेण |
वलयवते भोगभृता वनितार्धांगाय वस्तुनेऽस्तु नमः || 19 ||

सरसिजकुवलय-जागरसंवेशन जागरूकलोचनतः |
सकृदपि नाहं जाने सुतरांतं भाष्यकारमंजीरात् || 20 ||

आपाटलजूटाना-मानीलच्छायकंधरा-सीम्नां |
आपांडुविग्रहाणामाद्रुहिणं किंकरा वयं महसां || 21 ||

मुषितस्मरावलेपे मुनितनयायुर्वदान्यपदपद्मे |
महसि मनो रमतां मे मनसि दयापूरमेदुरापांगे || 22 ||

शर्मणि जगतां गिरिजानर्मणि सप्रेमहृदयपरिपाके |
ब्रह्मणि विनमद्रक्षणकर्मणि तस्मिन्नुदेतु भक्तिर्मे || 23 ||

कस्मिन्नपि समये मम कंठच्छायाविधूतकालाभ्रं |
अस्तु पुरो वस्तु किमप्यर्धांगेदरमुन्मिषन्निटलं || 24 ||

जटिलाय मौलिभागे जलधर नीलाय कंधराभोगे |
धवलाय वपुषि निखिले धाम्नेस्स्यान्मानसे नमोवाकः || 25 ||

अकरविराजत्सुमृगै-रवृषतुरंगै-रमौलिधृतगंगैः |
अकृतमनोभवभंगैरलमन्यैर्जगति दैवतं मन्यैः || 26 ||

कस्मै वच्मि दशां मे कस्येदृग्घृदयमस्ति शक्तिर्वा |
कस्य बलं चोद्धर्तुं क्लेशात्त्वामंतरा दयासिंधो || 27 ||

याचे ह्यनभिनवं ते चंद्रकलोत्तंस किंचिदपि वस्तु |
मह्यं प्रदेहि भगवन् मदीयमेव स्वरूपमानंदं || 28 ||

भगवन्बालतया वाऽभक्त्या वाऽप्यापदाकुलतया वा |
मोहाविष्टतया वा माऽस्तु च ते मनसि यद्दुरुक्तं मे || 29 ||

यदि विश्वाधिकता ते यदि निगमागमपुराणयाथार्थ्यं |
यदि वा भक्तेषु दया तदिह महेशाशु पूर्णकामस्स्यां || 30 ||

इति शिवानंदावधूतरचित शिवमानसिकपूजास्तोत्रं |